॥ શ્રીદશાવતારસ્તોત્રમ ॥

નમોઽસ્તુ નારાયણમંદિરાય નમોઽસ્તુ હારાયણકંધરાય ।
નમોઽસ્તુ પારાયણચર્ચિતાય નમોઽસ્તુ નારાયણ તેઽર્ચિતાય ॥ ૧ ॥

નમોઽસ્તુ મત્સ્યાય લયાબ્ધિગાય નમોઽસ્તુ કૂર્માય પયોબ્ધિગાય ।
નમો વરાહાય ધરાધરાય નમો નૃસિંહાય પરાત્પઆય ॥ ૨ ॥

નમોઽસ્તુ શક્રાશ્રયવામનાય નમોઽસ્તુ વિપ્રોત્સવભાર્ગવાય ।
નમોઽસ્તુ સીતાહિતરાઘવાય નમોઽસ્તુ પાર્થસ્તુતયાદવાય ॥ ૩ ॥

નમોઽસ્તુ બુદ્ધાય વિમોહકાય નમોઽસ્તુ તે કલ્કિપદોદિતાય ।
નમોઽસ્તુ પૂર્ણામિતસદ્ગુણાય નમોઽસ્તુ નાથાય હયાનનાય ॥ ૪ ॥

કરસ્થશંખોલ્લસદક્ષમાલાપ્રબોધમુદ્રાભયપુસ્તકાય ।
નમોઽસ્તુ વક્ત્રોદ્ગિરદાગમાય નિરસ્તહેયાય હયાનનાય ॥ ૫ ॥

રમાસમાકારચતુષ્ટયેન ક્રમાચ્ચતુર્દિક્ષુ નિષેવિતાય ।
નમોઽસ્તુ પાર્શ્વદ્વયગદ્વિરૂપશ્રિયાઽભિષિક્તાય હયાનનાય ॥ ૬ ॥

કિરીટપટ્ટાંગદહારકાંચીસુરત્નપીતાંબરનૂપુરાદ્યૈઃ ।
વિરાજિતાંગાય નમોઽસ્તુ તુભ્યં સુરૈઃ પરીતાય હયાનનાય ॥ ૭ ॥

વિદોષકોટીંદુનિભપ્રભાય વિશેષતો મધ્વમુનિપ્રિયાય ।
વિમુક્તવંદ્યાય નમોઽસ્તુ વિષ્વગ્વિધૂતવિઘ્નાય હયાનનાય ॥ ૮ ॥

નમોઽસ્તુ શિષ્ટેષ્ટદવાદિરાજકૃતાષ્ટકાભિષ્ટુતચેષ્ટિતાય ।
દશાવતારૈસ્ત્રિદશાર્થદાય નિશેશબિંબસ્થહયાનનાય ॥ ૯ ॥

॥ ઈતિ શ્રીવાદિરાજતીર્થશ્રીચરણવિરચિતં દશાવતારસ્તોત્રમ ॥